# द्वितीयसमाकलनपरीक्षा, 2017

## संस्कृतम्

**अवधि - होरात्रयम्** **कक्षा - दशमी** **पूर्णांकाः - अशीतिः**

**विद्यार्थिनः नाम ........................................................................................... वर्गः ....... दिनांकः - 14.9.2017 (गुरूवासरः)**

**निर्देशाः -**

- प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
  - खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः
  - खण्डः (ख) रचनात्मक – कार्यम् - 15 अङ्काः
  - खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 25 अङ्काः
  - खण्डः (घ) पठित– अवबोधनम् - 30 अङ्काः
- सर्वे प्रश्नाः अनिवार्याः सन्ति।
- प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि।
- उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्डः क (अपठितावबोधनम् - 10 अंकाः)

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत -**

**परीक्षायाः दिनानि अतिविचित्राणि भवन्ति । यथा-यथा परीक्षाकालः समीपम् आयाति तथा-तथैव छात्राणां हृदयगतिः वर्धते । परीक्षा प्रायशः छात्रेभ्यः भयप्रदा एव प्रतीयते । अस्मिन्काले न निद्रैव आयाति न च हृदयं धारयितुं शक्यते, बुभुक्षाऽपि सम्यक्प्रकारेण नानुभूयते । कदाचित् कस्मिंश्चित् विषये अभ्यासाल्पता प्रतीयते कदाचिच्च अन्यस्मिन् । मस्तिष्कः सदैव तनावयुक्तः एव प्रतीयते । न केवलं छात्राणाम् अपितु तेषाम् अभिभावकानामपि दशा एतादृशी एव भवति, परन्तु ये छात्राः उत्तमाः भवन्ति वर्षस्य प्रारम्भात् एव पठितस्य अभ्यासं कुर्वन्ति । ते सर्वथा शान्तमनसा परीक्षाम्बुधिं तरन्ति अतः सर्वैः एव छात्रैः एवमेव करणीयम्, तदैव ते परीक्षाभयात् मुक्ताः भूत्वा परीक्षासु सदैव सफलाः भवन्ति ।**

**क) एकपदेन उत्तरत -** **(½×4=2)**

**अ) कः सदैव तनावयुक्तः प्रतीयते ?**

**ब) छात्रेभ्यः का प्रायशः भयप्रदा प्रतीयते ?**

**स) ये पुनरावृत्तिं कुर्वन्ति ते शान्तमनसा किं तरन्ति ?**

**द) परीक्षायाः दिनानि कीदृशानि भवन्ति ?**

**ख) पूर्णवाक्येन उत्तरत -** **(2×2=4)**

**अ) उत्तमाः छात्राः वर्षस्य प्रारम्भात् एव किं किं कुर्वन्ति ?**

**ब) अस्मिन्काले (परीक्षाकाले) किं किं भवति ?**

**ग) निर्देशानुसारं उत्तरत -** **(½×4=2)**

**अ) 'बुभुक्षा' इति कर्तृपदस्य क्रियापदं किम् ?**

(i) अपि (ii) वर्धते (iii) नानुभूयते (iv) अनुभूयते

ब) 'सागरम्' इत्यस्य पर्यायपदं चित्वा लिखत -

(i) समुद्रम् (ii) पयोधिम् (iii) अम्बुधिम् (iv) परीक्षाम्बुधिम्

स) 'परीक्षा भयप्रदा' अत्र विशेष्यपदं किम् ?

(i) परीक्षायाः (ii) परीक्षा (iii) भयम् (iv) भयप्रदा

द) 'ते' इति पदस्य विपरीतार्थकं पदं चित्वा लिखत -

(i) तव (ii) मम (iii) ये (iv) तैः

**घ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।** **(2×1=2)**

## खण्डः - ख (रचनात्मककार्यम् - 15 अंकाः)

**प्र.2 पत्रलेखनम् ।** **(½×10=5)**

सुजाता दिल्लीमहानगरे वसति । तस्याः सखी दिव्यामहादेवन् चेन्नईनगरे निवसति । सुजातायाः विद्यालये पर्यावरणविषये एका गोष्ठी जाता । गोष्ठीं वर्णयन्ती सुजाता दिव्यायै एकं पत्रं लिखति। मञ्जूषातः पदानि चित्वा पत्रं प्रपूर्य पुनः लिखत -

20, वसन्तविहारः
नवदिल्लीतः
तिथि 14.9.2017

(1)................. दिव्ये ।

नमस्ते ।

ह्यः अस्माकं विद्यालये (2)................. एका महत्त्वपूर्णा गोष्ठी अभवत् । तत्र महानगरेषु वर्धमानं प्रदूषणं दृष्ट्वा पर्यावरणस्य (3)................. उपायानां विषये चर्चा अभवत् । गोष्ठ्यां वक्तॄणां विचारसारः आसीत् यत् गृहात् बहिः (4)................. रथ्यासु च अवकरः न क्षेपणीयः । (5).............. समये-समये जलशुद्धिः करणीया । मार्गेषु, उद्यानेषु विद्यालयेषु च अधिकाधिकं (6)................. आरोपणीयाः । जनजागरणार्थं 'वृक्षो रक्षति रक्षितः' 'जलम् एव जीवनम्' एतादृशानि महावाक्यानि पट्टिकासु लिखित्वा यत्र तत्र (7)................. ।

ध्वनिप्रदूषणं निवारयितुं ध्वनिप्रसारकयन्त्राणां (8)................. प्रयोगः करणीयः । अस्मिन् विषये भवत्याः विद्यालये किं किं भवति इति मां विस्तरेण लिखतु ।

पितरौ वन्दनीयौ ।

भवत्याः सखी
(9).................

सविधे
सुश्री (10).................
52, मरयापट्टी
चेन्नई - 641 008

मञ्जूषा -

| |
|---|
| नदीजलेषु, सुजाता, स्नेहस्निग्धे, पर्यावरणविषये, न्यूनतमः, वृक्षाः, रक्षणाय, दिव्यामहादेवन्, टंकनीयानि, जलप्रदूषणनिवारणाय । |

**प्र.3** **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः प्रदत्तशब्दानां सहायतया संस्कृते पञ्चवाक्यानि रचयत ।** **(2×5=10)**



**मञ्जूषा -**

| |
|---|
| वनमहोत्सवः, जनाः, वृक्षारोपणम्, वायुः, वातावरणम्, छात्राः, अपि, वर्षाकाले, वृक्षाः, रोपयन्ति, पादपाः, बालिका |

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 25 अंकाः)

**प्र.4** **निम्नलिखितवाक्येषु रेखाकिंतपदानां सन्धिं विच्छेदं वा कृत्वा लिखत -** **(1×4=4)**

क) एतत् आसनं कवे + ए अस्ति ।

अ) कवै ब) कवय स) कवये द) कवेः

ख) सूपकाराः मृण्मयं भाजनेन तम् अताडयन् ।

ग) कः स्यात् पापतरः + ततः ।

घ) तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ !

**प्र.5** **अधोलिखितेषु वाक्येषु रेखांकितपदेषु समासं विग्रहं वा कृत्वा लिखत -** **(1×4=4)**

क) भगवन् ! भवतः मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि ।

अ) भवत्मनोरथं ब) भवन्मनोरथं स) भवद्मनोरथं द) भवंमनोरथम्

ख) साश्रुनयनो यूथपतिः उक्तवान् ।

ग) कथय पुनः के शशिनः किरणसमाः ?

घ) पुष्करे चत्वारि आननानि यस्य सः पूज्यते ।

**प्र.6** **अधोलिखितवाक्येषु रेखांकितपदेषु प्रकृति-प्रत्ययान् संयोज्य विभज्य वा लिखत -** **(1×4=4)**

क) एतत् सरः अस्माभिः .............................. (दृश् + अनीयर्)

अ) दर्शनीयः ब) दर्शनीयम् स) पश्यनीयः द) दर्शनियः

ख) मम गुरवः .............................. (गुण + मतुप्) सन्ति ।

ग) अस्माकं देशे अनेके .............................. (दर्शन + ठक्) सन्ति ।

घ) सम्प्रति त्वया राष्ट्रसेवा न त्यक्तव्या ।

**प्र.7** **अधोलिखितसंवादे रिक्तस्थानानि वाच्यानुसारं पूरयित्वा लिखत -** **(1×3=3)**

ऋचा - सुधे ! त्वं किम् करोषि ?

सुधा - ऋचे ! (1)................ कादम्बरी पठ्यते, त्वया इदानीं किं क्रियते ?

ऋचा - अहम् (2)................. रचयामि ।

सुधा - त्वया तु सुन्दराणि छायाचित्राणि (3)................. ।

क) रचयते ख) रच्यन्ते ग) रचयसि घ) रचयन्ति

**प्र.8 अधोलिखितायां समयसारिण्यां अंकानां स्थाने संस्कृतपदेषु समयम् लिखत -** **(½×4=2)**

**विद्यालये वार्षिकोत्सवस्य समयसारिणी -**

प्रातः (1).................10:15................. मुख्यातिथेः आगमनम् ।

प्रातः (2).................11:30................. मुख्यातिथेः स्वागतम् ।

मध्यान्हे (3).................12:00................. प्रधानाचार्येण वार्षिक-विवरणपाठः नाट्याभिनयः च ।

मध्यान्हे (4).................1:45................. छात्रैः राष्ट्रगानम् ।

अ) पादोनद्विवादने ब) पादोनैकवादने स) सार्धैकवादने द) सपादैकवादने

**प्र.9 अधोलिखितवाक्येषु रिक्तस्थानानि उचित-अव्ययपदैः मञ्जूषापदसहायतया पूरयित्वा लिखत -** **(1×4=4)**

| **ह्यः, शनैः, वृथा ।** |
|---|

क) ज्ञानं विना जीवनम् ............................. ।

ख) शिशुः ............................. चलति ।

ग) मम गृहे ............................. विद्युत् नासीत् ।

घ) कूपे जलं ............................. अस्ति ।

अ) उच्चैः ब) नीचैः स) श्वः द) इतस्ततः

**प्र.10 अधोलिखितवाक्येषु रेखांकितपदं संशोध्य वाक्यानि पुनः लिखत -** **(1×4=4)**

क) <u>माम्</u> एषः विषयः अतीव रोचते ।

ख) <u>याः</u> छात्राः योग्याः सन्ति, तेषाम् प्रशंसा भवति ।

ग) पाठ्यपुस्तके एकादश <u>पाठानि</u> सन्ति ।

घ) अहं वाञ्छामि यत् भवन्तः सफलाः <u>भवेत</u> ।

अ) भवेत् ब) भवतु स) भवेयुः द) भवाम

## <u>खण्डः - घ (पठितावबोधनम् - 30 अंकाः)</u>

**प्र.11 अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत -**

**क) गद्यांशः -**

अथ कदाचित् दानशालासु विचरन् सः राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत्-''ममार्थिनस्तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते । एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम् ।''

**अ) एकपदेन उत्तरत -** **(2×1=2)**

**(i)** राज्ञः निरासक्तिः केषु जाता ?

**(ii)** राजा कुत्र भ्रमति स्म ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

'दानवीराः सौभाग्यशालिनः भवन्ति ।' अस्मिन् वाक्ये कः जीवनसन्देशो वर्तते ?

**स) भाषिककार्यम् -** **(½×4=2)**

(i) 'ममार्थिनस्तु धनलाभमात्रेण' इत्यत्र 'मम' पदं कस्मै प्रयुक्तम् ?

(a) इन्द्राय (b) नृपाय (c) मित्राय (d) अमात्याय

(ii) 'भजन्ते' इति क्रियापदस्य कर्तृपदं किम् ?

(a) सन्तोषः (b) जनाः (c) अर्थिनः (d) शत्रुः

(iii) 'वीक्ष्य' इत्यस्य पदस्य कः पर्यायः गद्यांशे प्रयुक्त ?

(a) दृष्ट्वा (b) अवलोक्य (c) विलोक्य (d) सहसा

(iv) ' ब्रह्माण्डं व्याकुलं सञ्जातम्' एतेषु पदेषु विशेष्य पदं किम् ?

(a) ब्रह्माण्डं (b) व्याकुलं (c) सजातम् (d) अण्डम

**ख) पद्यांशः -**

ध्यायतः विषयान् पुंसः सङ्.गस्तेषूपजायते ।
सङ्.गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।।

**अ) एकपदेन उत्तरत -** **(2×1=2)**

(i) पुमान् कान् ध्यायति ?

(ii) कः सङ्.गात् सञ्जायते ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

विषयान् ध्यायतः पुंसः तेषु कः उपजायते ?

**स) भाषिककार्यम् -** **(½×4=2)**

(i) 'ध्यायतः' इत्यस्य विशेष्यपदं अत्र किम् ?

(a) पुंसः (b) सङ्.गः (c) विषयान् (d) कामः

(ii) 'कामः' इति कर्तृपदस्य क्रियापदं किम् ?

(a) सञ्जायते (b) जायते (c) अभिजायते (d) उपजायते

(iii) 'अभिजायते' इति क्रियायाः श्लोके पर्यायः कः ?

(a) सङ्.गः (b) सञ्जायते (c) पुंसः (d) कामः

(iv) 'वैराग्यः' इत्यस्य कः विपर्ययः अत्र लिखितः ?

(a) कामः (b) सङ्.गः (c) क्रोधः (d) पुंसः

**ग) नाट्यांशः -**

यूथपः - सूपकाराणाम् मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति । उक्तं हि-तस्मात् यत्र गृहे नित्यम् अकारणः कलहः स्यात् । जीवितं वाञ्छन् तद् गृहं दूरतः परिवर्जयेत् । ततः सर्वेषां संक्षयो न भवेत्, तदेतत् राजभवनं परित्यज्य वनं गच्छामः ।

कपयः - (प्रहस्य) - भो ! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षारतिक्तकषायकटुरूक्षफलानि भक्षयिष्यामः ।

यूथपः - रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामम् न जानीथ । अहं तु वनं गच्छामि।

**अ) एकपदेन उत्तरत -** **(2×1=2)**

(i) के रसनास्वादलुब्धाः मूर्खाः ?

(ii) कः वनं गच्छति ?

ब) **पूर्णवाक्येन उत्तरत -** (2×1=2)

यूथपः वानरान् किम् आदिशत् ?

स) **निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत ।** (½×4=2)

(i) 'यूयम्' इति कर्तृपदस्य किं क्रियापदम् ?

(a) भक्षयिष्यामः (b) विहाय (c) जानीथ (d) गच्छामि

(ii) 'वानराः' इति अर्थे किम् अन्यत् पदम् अत्र प्रयुक्तम् ?

(a) कपयः (b) सूपकाराणाम् (c) वानरः (d) अरण्याम्

(iii) 'न वयं स्वर्ग .......' अत्र 'वयं' पदं कस्मै प्रयुक्तम् ?

(a) सूपकारेभ्यः (b) वानरेभ्यः (c) यूथपतये (d) मेषाय

(iv) 'गृहीत्वा' इत्यस्य विपरीतार्थकम् पदं चित्वा लिखत -

(a) प्रहस्य (b) परिवर्जयेत् (c) विहाय (d) स्वीकृत्य

**प्र.12 वाक्येषु रेखांकितपदानां स्थाने उचितं प्रश्नवाचक-पदैः प्रश्ननिर्माणं कुरूत -** (1×4=4)

क) तस्य पुत्राः वानरक्रीडारताः आसन् ।

ख) सः नृपः अर्थिनां विरलसंख्याम् अपश्यत् ।

ग) विचक्षणैः ते मित्ररूपाः रिपवः सम्भाष्यन्ते ।

घ) शारदा अस्माकं वदनाम्बुजे सन्निधिं क्रियात् ।

**प्र.13 अधोलिखितश्लोकयोः अन्वयं मंजूषायाः सहायतया पूरयित्वा पुनः लिखत -** (½×8=4)

क) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।

स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः उच्यते ।।

**अन्वयः** - अनुद्वेगकरं (1)...................... प्रिय (2)...................... च यत् वाक्यम् ।
स्वाध्याय (3)...................... च एव (4)...................... तपः उच्यते ।

ख) तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः ।

तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् ।।

**अन्वयः** - तस्मात् यत्र गृहे (5)................ अकारणः (6)................स्यात् (7)................
वाञ्छन् तद्गृहं (8)................ परिवर्जयेत् ।

**मञ्जूषा - | कलहः, दूरतः, सत्यम्, अभ्यसनं, जीवितम्, वाङ्मयम्, नित्यम्, हितम्**

**प्र.14 रेखांकितपदानां प्रसंगानुसारं शुद्धम् अर्थं लिखत -** (1×4=4)

क) हेयम् अपि च किम् ?

अ) ग्राह्यम् ख) त्याज्यम् ग) प्राप्यम् घ) शुभम्

ख) किं जीवितम् अनवद्यम् ।

अ) अपयशः ख) अनित्यम् ग) अनिन्द्यम् घ) वचनीयम्

ग) विचारं श्रुत्वा अमात्याः अवदन् ।

घ) ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ।